# अष्टमः पाठः । मनसः स्वच्छता ।

'श्यामची आई' इति पाण्डुरङ्ग सदाशिव साने (साने गुरुजी) महोदयेन मराठीभाषया विरचितं पुस्तकम्। अस्मिन् पुस्तके तस्य आत्मकथनपराः कथाः सन्ति। एताः स्मरणकथाः बालकानां कृते बोधपराः संस्कारक्षमाः मातृस्नेहवर्धकाः च। श्यामः प्रतिरात्रं स्वमित्रेभ्यः स्वजीवनाधारिताः स्मृतिकथाः कथयति। संस्कृतानुवादद्वारा अस्य आदर्शभूतस्य पुस्तकस्य परिचयः कारितः **डॉ. मञ्जूषा कुलकर्णी** महाभागया। तस्मात् पुस्तकात् अयं प्रसङ्गः।




''बाल्यादेव द्विवारं स्नानं करोमि स्म अहम् ।'' श्यामेन कथा आरब्धा। ''द्विवारं स्नानस्य अभ्यासः उत्तमः एव। रात्रौ निद्रायाः पूर्वं स्नानं कुर्मः चेत् शरीरं स्वच्छं, सतेजः, लघुभारमिव च भासते। निद्रायाः पूर्वं वयं प्रार्थनां कुर्मः, एतत् भवति मनसः स्नानम्। यदि शरीरं मनः च स्वच्छे तर्हि निद्रा उत्तमा भवति।



एकदा प्रतिदिनमिव खेलित्वा अहं गृहम् आगत्य स्नानार्थं गतवान्। सायङ्कालस्य स्नानार्थम् अधिकस्य जलस्य आवश्यकता न भवति। स्नानं समाप्य मया उक्तम्, ''अम्ब, शुष्कय मे अङ्गम्। जलं समाप्तं, सत्वरं शुष्कय मे अङ्गम्'' इति उच्चैः अवदम् अहम्। सायङ्काले मे माता स्वशाटिकया एव मम शरीरं मार्जयति स्म।

माता आगता, मम अङ्गं मार्जितवती आज्ञां च दत्तवती ''देवपूजार्थं पुष्पाणि आनय, श्याम'' इति। ''मम पादतलौ आर्द्रौ स्तः। मृत्तिकया मलिनौ भविष्यतः। अतः मम पादतलौ अपि स्वच्छीकुरु।'' इति मया कथितम्। ''पादतलौ आर्द्रौ स्तः तर्हि किं जातं रे श्याम ? अधुना केन वस्त्रेण मार्जयामि ?'' ''अम्ब, तव शाटिकाञ्चलं पाषाणे विस्तारय ।'' ''श्याम, अतीव हठस्वभावः असि।'' इति उक्त्वा मात्रा शाटिकाञ्चलं विस्तारितम्। अहं चरणौ तदुपरि स्थापयित्वा शुष्कौ कारयित्वा निर्गतवान्। मातुः वस्त्रम् आर्द्रम् अभवत्।

तस्मिन् समये तया शाटिकापरिवर्तनं कर्तुं न शक्यते इत्यपि मया न चिन्तितम्। परन्तु पुत्रचरणौ मलिनौ न भवेताम्, पुत्रेच्छा पूर्णा भवेत् एतदर्थं तया स्वशाटिका आर्द्रा कृता। माता पुत्रार्थं किं किं न करोति, किं किं न सहते, किं किं न समर्पयति? अहं गृहस्य अन्तर्भागं गतवान्, पूजार्थं पुष्पाणि स्थापितवान्। माता दीपं गृहीत्वा आगतवती उक्तवती च, ''श्याम, चरणौ मलिनौ न भवतः अतः यथा प्रयतसे तथैव मनः मलिनं न भवतु एतदर्थम् अपि प्रयतस्व। प्रार्थयस्व देवं शुद्धबुद्ध्यर्थम्।''

भो मित्राणि, कियन्तः मधुराः शब्दाः! पावित्र्यार्थं स्वच्छतायै वयं प्रतिदिनं प्रयतामहे। वस्त्रस्वच्छतार्थं क्षालनचूर्णम् अस्ति, शरीरार्थं चन्दनफेनकानि सन्ति। शरीरं वस्त्राणि च मलिनानि न भवन्तु अतः सर्वे प्रयत्नं कुर्वन्ति। अपि वयं मनसः स्वच्छतायै प्रयतामहे ?''

भाषाभ्यासः 

**१. एकवाक्येन उत्तरत।**

१) निद्रा कदा उत्तमा भवति? २) स्नानेन किं भवति? ३) कदा प्रार्थनां वदामः?
४) माता श्यामस्य चरणौ केन मार्जयति? ५) वयं प्रतिदिनं किमर्थं प्रयतामहे ?

**२. माध्यमभाषया लिखत।** मनसः स्वच्छताविषये माता श्यामं किं बोधितवती?

**३. अ) सन्धिविग्रहं कुरुत ।** १. लघुभारमिव २. इत्यपि ३. इतोऽपि ४. तथैव ५. कदापि

**आ) वर्णविग्रहं कुरुत।** १. पादतलौ २. स्नानस्य

**इ) विशेषण-विशेष्य-सम्बन्धः।**

| विशेष्यम् | पादतलौ | अभ्यासः | मनः | शरीरम् |
|---|---|---|---|---|
| विशेषणम् | सतेजः | मलिनम् | आर्द्रौ | उत्तमः |

**४. समानार्थकशब्दयुग्मं चिनुत।** शरीरम्, मृत्तिका, चरणौ, मित्रम्, मनः, मृद्, सुहृद्, चित्तम्, पादौ, देहः

**५. विरुद्धार्थकं शब्दं लिखत।** पवित्रम्, शुष्कम्, नीचैः, स्वच्छम्, अधिकम्, सत्वरम्।

CG9QTT

**६. उपपदविभक्तिं योजयत।**

१. -------पूर्वं वयं प्रार्थनां वदामः। (निद्रायाः/निद्रायै)

२. एकदा नित्यमिव खेलित्वा अहं ------ आगतः। (गृहे/गृहम्)

**७. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १. मात्रा स्वशाटिका आर्द्रा कृता यतः .....।

अ) सा वर्षायां क्लिन्ना । आ) तेन पुत्रेच्छा पूर्णा भवेत् ।

| ॥ अमरकोषः ॥ | विग्रहः। |
|---|---|
| कुक्कुरः - कौलेयकः सारमेयः कुक्कुरो मृगदंशकः। | कौलेयकः, सारमेयः, कुक्कुरः, मृगदंशकः। |
| कृपणः - कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः। | कदर्यः, कृपणः, क्षुद्रः, किंपचानः, मितंपचः। |
| शोभनम् - सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्। | सुन्दरम्, रुचिरम्, चारु, सुषमम्, साधु, शोभनम्। |
| मलिनम् - मलीमसं तु मलिनं कच्चरं मलदूषितम्। | मलीमसम्, मलिनम्, कच्चरम्, मलदूषितम्। |
| प्रभूतम् - प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु। | प्रभूतम्, प्रचुरम्, प्राज्यम्, अदभ्रम्, बहुलम्, बहु। |
| पूर्णम् - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। | समग्रम्, सकलम्, पूर्णम्, अखण्डम्, अनूनकम्। |
| पुत्रः - आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। | आत्मजः, तनयः, सूनुः, सुतः, पुत्रः। |
| राक्षसः-राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः। | राक्षसः, कौणपः, क्रव्यात्, क्रव्यादः, अस्रपः, आशरः। |
| शङ्करः - शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः। | शम्भुः, ईशः, पशुपतिः, शिवः, शूली, महेश्वरः। |
| मेघः - अभ्रं मेघो वारिवाहस्तडित्वान् वारिदोऽम्बुभृत्। | अभ्रम्, मेघः, वारिवाहः, तडित्वान्, वारिदः, अम्बुभृत्। |
| नभः - नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्। | नभः, अन्तरिक्षम्, गगनम्, अनन्तम्, सुरवर्त्म, खम्। |
| महिला - प्रतीपदर्शिनी वामा वनिता महिला तथा। | प्रतीपदर्शिनी, वामा, वनिता, महिला। |
| जगत् - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। | जगती, लोकः, विष्टपम्, भुवनम्, जगत्। |
| वर्ष - संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः। | संवत्सरः, वत्सरः, अब्दः, हायनः, शरद्, समाः। |
| शुभम् - श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्। | श्वःश्रेयसम्, शिवम्, भद्रम्, कल्याणम्, मङ्गलम्, शुभम्। |